[1]कटप्रूः-कटप्रुवौ-कटप्रुवः, [2]प्रवकः, [3]प्रवणः, [4]प्रावयन्-प्रावयिष्यन्-न्ती-ती, इति इमानि रूपाणि अस्य धातोः भवन्तीति विशेषः ।

## (1075) " प्रुष स्नेहनसेवनपूरणेषु "

(IX-क्र्यादिः-1527. सक. सेट्. पर.)

'—सेचन....' इति क्षीरस्वामि-पुरुषकार-कविकल्पद्रुमसम्मतः पाठः । मैत्रेयस्तु '....मोचन....' इति पपाठ । 'मोहनदाहनयोरप्याह शङ्करः । इति धा. का. व्याख्या (3-12) । अयं 'प्रूष—' इति दीर्घोपध इति बालमनोरमा ।

'—स्नेहनादिषु । प्रुष्णाति च, प्रोषति च दाहे—॥' (श्लो. 172) इति देवः । प्रोषकः-षिका, प्रोषकः-षिका, पुप्रोषिषकः-पुप्रुषिषकः-षिका, पोप्रुषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि । [5]विप्रुट् । [6]प्रुष्णन्[A] ।

## (1076) " प्रुषु दाहे " (I-भ्वादिः-703. सक. सेट्. पर.)

'—स्नेहनादिषु । प्रुष्णाति च, प्रोषति च दाहे—॥' (श्लो. 172) इति देवः । प्रोषकः-षिका, प्रोषकः, पुप्रोषिषकः-पुप्रुषिषकः-षिका, पोप्रुषकः-षिका-इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि । [7]प्रोषित्वा-प्रुष्ट्वा,

---

1. कटं प्रवते इति **कटप्रूः** = कामरूपी कीटश्च । 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च' (वा. 3-2-178) इत्यनेन सोपपदात् क्विपि प्रकृतेर्दीर्घः । द्विवचनादिषु उवङादेशः ।
2. 'प्रुसृल्वः समभिहारे वुन्' (3-1-149) इति कर्तरि वुन्प्रत्ययः । अनादेशः । **समभिहारः** = साधुकारित्वम् ।
3. 'चलनशब्दार्थादकर्मकाद् युच्' (3-2-148) इति तच्छीलादिषु कर्तृषु युच् प्रत्ययः । णत्वम् । अकर्मकत्वं विवक्षाभेदेनेति ज्ञेयम् ।
4. 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' (1-3-86) इति कर्तृगामिन्यपि क्रियाफले ण्यन्तात् शतैव, न शानच् ।
5. क्विपि षकारस्य जश्त्वेन डकारः । **विप्रुट्**=पामा ।
6. शतरि क्रैयादिकत्वात् श्नाप्रत्यये, 'श्नाऽभ्यस्तयोः—'(6-4-112) इत्याकारलोपे णत्वे च रूपम् ।
7. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । इट्पक्षे 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् **प्रोषित्वा** इति रूपम् ।

A. '**प्रुष्णन्** सतां प्रियमयं प्लुषिताङ्गरागः......।' धा. का. 3. 12.